यंतो परिधारयद्रवद्दरापारत्वसमूचकं॥ स्तोमैर्वेदोच्चाधरुद्रैः श्रुतिपदतिलकैर्येकृ चैस्त्वोन्न
रीयैः साम्नां देव अनतानाम रखिल श्रिवतरोरतभ तरस्वमीशः॥ वामध्वरेवांसि ता रस्र वंति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सोमात्मकं

रथंतरंसाममगाश्चोपमृंति॥ अध्वर्यवः कल्पयन्तेचभागंचाध्वरेत्वामसीद॥ अपर्णेरमणंदृष्ट्वा लुप
र्णगन्धिरुत्तमं॥ प्रांजलिःश्रीमहेश्वरंतुष्टावमणतस्तदा॥ विष्णुरुवाच॥ सोमस्त्वंजनिताजगज्जन
यिताविलोकस्तथाब्रह्मणःसुत्राम्णःपवनस्यवन्हिजनकःसूर्यादिवोवैमतेः॥ अर्यम्णोजनक
स्त्वमेवभगवान्देवासुराणांपुनविश्वंत्वद्वमेवसर्वमधुनावेदोपिवक्तिस्वयं॥ अग्निसोम
मयंजगच्छ्रुतिगणेसर्वत्रसंपठ्यतेतस्मात्सर्वजगद्गतंचभगवन्बद्धिश्वसोमात्मकं॥ रुद्रो
वाएषचाग्नि॥ श्रुतिपदत्वानकेनार्थएवस्तमीड्यःसोमश्चोमामहेशप्रकृतिपुरुषंजंद्विश्व
मेतद्विचित्रं॥ हंसमंत्राक्षरगतंहंसवाहोमहेश्वरं॥ प्रांजलीरुद्रमंत्रैश्चतुष्टावजगदीश्व
रं॥ ब्रह्मोवाच॥ अरुणतरणिरुच्छतान्वमात्मास्वमीशं॥ नीलग्रीवंसुदारंद्विभुस्तन
तंरुद्रेःसहस्रंतंज्योद्रपश्यमसचक्षुषासुललितं॥ विश्वेशामस्याद्राहागोपाल
वधाद्वृचेद्विरहोद्व्यन्तदायोनिधिः॥ वध्रुर्बभ्रुराद्यपिश्रुतिगतेरुद्रेस्वमु
द्युष्मसेकूरान्कोद्रयसेरिपून्पतितयापवीराद्रजीयसे॥ सबानलवधोदस्सु
रवयितुंपापंलदीयंपुननिःकृष्टंसहस्रेतमीशाद्दययापान्नेनपुत्रासितातनू॥ स्कन्द
उवाच॥ वनोनओजस्वितरोसिदेवःपतिःपशुनांमहिमाप्रतिष्ठः॥ वह्निंमस्त्रे
प्रजननमात्रतुष्टःस्यानारपीणांपतयावयंहिवमामलनंधववभूर्बहून्स्वदोषेक
नाद्रोस्तहोषवदीयंमहालिंगसंगकदाचित्सुमुक्तिंधववसवधूनांदिसंगः॥ नदृष्टि
रद्ववक्रेपश्चंडादंडेनराजतः॥ संस्तुतःपरमेशानःप्रणतार्तिहरोहरः॥ गणपति

स

महालन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऊचतुः हनुमो हमद्य गत एव वदीयं पदाब्जं समगयं महीयें फणींद्रः यमादमदुग्ना मो
संगता मैमार्गेन पश्यामि राघवप्रपन्न प्रपन्नः॥ सुधामंडलो खंडलोच्चंडतेजः स्फुरन्मे
रुकोदंडपाणिखिलांतो॥ वदाशाबलावंद जितारातिषंडं समुच्चंडमुंडारणींद्रप्रपन्नः
पठ छोठहसूक्तेनमुनिब्रालेन नरांकरः॥ संस्तुतः परमेशोऽयं साधिकृततरोस्वरः॥ मुन न
य ऊचुः॥ पुराक्षिदं वामक्षितः प्रणानुमो॥ आषाढमुग्नं सहमान मीनं॥ जेनारमी
रां न कुतापराजिलं धनुर्धरं हेमेहिलिधरं नतास्म ः॥ भूरेद्दीमारं समहतिं रुद्रसूक्तैः
अतोष्यामस्त्वां भावयुक्ता गणानानः॥ तस्मादस्मान् रक्ष रक्षेरम्हं ज्ञो मामेयास्मि
न्मातुरं नै[illegible] वभूयात्॥ देवा ऊचुः॥ भगवंस्त्वत्सुदर्याघ्रिपद्मं पुरुहूतामरवृंद
संस्तुतं॥ प्रणतास्म पुनः पुनर्मुदारामिनारोषदुरंतदुःखजालं॥ इत्थं सुराणां
वचनं श्रुत्वा महेश्वरः॥ महाकालांतिकं प्राप योपयस्तुवनत्रयं॥ भवक्षाक्षिनदि
र्णांचत्रः सुधांशुकिरणे शिवः॥ दिवाकरस्तोऽसा सुधांशुकिरणे स्तदा
महाकालांगसंस्पर्शास्तच्छ्रमं समुपानुदत्॥ शिवसंदर्शनानंदसंजातपुलकोद्
गमः॥ प्रणनाम ससाष्टांगं अष्टांगस्पृष्टभूतलः॥ हरपादांबुजद्वंद्वनिर्द्वंद्वी
कृतमानसः॥ समुत्थाय प्रहृष्टात्मा तुष्टाव बद्धांजलिर्हरं॥ हर हर दुरिताग्निहीन बंधो
पुरहर पाहि दयाकटाक्षलेशेः॥ मुरहर हर हार कुंदेंदरनघाभरपाप्रसीद शंभो॥

महाकालः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तपनदहनपमजानमित्रं प्रतिकृतिभूतमभूनवर्गः॥ मधुमथनाब्जक्षिपूज्यपादपमप्रम
॥१५॥ थनोसेथमहेशापाहिशंभो॥ मत्तानंगकरीन्द्रदारणपटुं पंचास्यपंचाननं गंगातुंगतरंग
संगतमहामौलौपिशंगायिने॥ भृंगांसंगाहरंकुरंगविलसत्पाणिं प्रभामंडलं तुंगानी
रपतंगसोदरमहामूलस्थलिंगाकृतिं॥ हिरण्यैकबाहुं हिरण्यैकवर्णं हिरण्यैकरूपं
हिरण्यादिदेवं॥ हिरण्याख्ययाहैंस्त्रहंतारमीशं हिरण्याचलावासकन्यासमेतं गं
भीरसागरनिषंगं पिनाकपाणिं सोमाग्निविष्णुशरकृत्रिपुरादिवर्गं॥ क्ष्मास्यंदनां
नरगतं॥ शशिसूर्यचक्रं वेदाश्वसारथिविधिं रथिनां वरेण्यं॥ नतोस्म्यीशमाद्यं
सुगंधेरपीड्यं सुगंधिं नतोस्मि प्रपद्ये हराश्वत्तु॥ नतोस्मीश सिध्ये नतोस्मीश
सुतत्त्ये नतोस्मीश भक्त्या प्रपद्ये प्रपद्ये॥ रसकुसकरिमदन्नपद्मान्धकं ध्वस्त
दक्षमखकृतिसुवासः॥ मारमारकृचिरं तनदुःखान्याशु संहर विभो दुरितानि॥
भवोद्भवमनोन्मनीसहितदिव्यगंधोल्लसन्मरंदसुमशीतलस्फुरदुरुप्र…
गकः॥ महेश्वरमहाहाफणाधूसितकोटिभोगप्रियप्रपंचरचौदरप्रवरदेवमाप्य
लय॥ भवभावहदंतराजगमभवभावभवस्थितिप्रदः गतभावविहारगांगसो ॥१५॥
भवबंधप्रविनाशायाशुमे॥ भवभूतपते भवोद्भवाद्यतत्विभक्त्याभगवन्नू ना
भवाब्धिपारं॥ प्रसितैर्वसितैर्वपाशनाशकैः परिधूत्य कमनाशं
निभावा॥ चित्रं चित्रनेत्र सुधीचरित्र विचित्रगाथाश्रोत्रअयेण निखिलं यथा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्नगात्रं॥ वांछानमां भजतिपुत्रकलत्रमित्रसद्यातिरात्रिविविधेषु मखभुग्नं भो
तुरंगदत्तसुत्तमभूमिदानैरन्नादिकन्यासुमहान्नदानैः॥ उग्रध्याप्रदानैरविबिल्वैश्च
धर्मैरलं महेशानपदं व्रजामि॥ सूत उवाच॥ स्तुत्वैवं स महादेवं तेजोराशिं दय
यानिधिं॥ शिवं ननाम साष्टांगं मुहुर्मुहुरनन्यधीः॥ प्रणमंतं महाकालं समु
त्थाप्य महेश्वरः॥ पस्पर्शतस्य सर्वांगं शंतमेनाथ पाणिना॥ कृशानुरेव सो स्कु
ल्लहस्ताब्जस्पर्शेन हर्षितः॥ तपःकृशात्वं द्विजहाशुधांशुरिव निर्मलः॥ चतुर्बा
हुरुदारांगः पिनाकमृगसत्करः॥ कपर्दभागविलसच्चंद्रार्धकृतशेखरः॥ महा र
कालः सुरैर्दृष्टो द्वितीय इव शंकरः॥ विभ्राजन्देवतानीकं मुनीन्विस्मापयं
स्तदा॥ सुरान्प्रहर्षयन्शंभुर्महाकालमथाब्रवीत्॥ ईश्वर उवाच॥ महाकाला
नया स्तुत्या तुष्टोहं त्वयि हर्षितः॥ गणाधिपत्यं दत्तं ते शाश्वतं तव पुत्रक॥ शा
र्वाणीतनयोसि त्वं गीर्वाणगणवंदित॥ गजाननगुहावेतौ सपूज्यस्त्वांतरेण
तु॥ नंदिकेशादयस्तेद्य सखायस्तेकुलामलाः॥ महाकालमिदं लिंगं महाशैव
समर्चितं॥ महाप्रदोषवेलासु महादेवगणाभवेत्॥ क्षेत्रमेतच्छिवकरं मम प्रियं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गणेश्वरः॥ अस्मान्नान्यत्र गच्छंति स्थानमाहात्म्यवेदिनः॥ इति देववचः श्रुत्वा देवाः
॥१६॥ वचनमब्रुवन्॥ देवा ऊचुः॥ धन्योयं कृतकृत्योयं भवत्प्रसादाच्चेनरनः॥ गणाधिप
त्वं संप्राप्तविदर्शों दुस्सुदुर्लभं त्वत्कृपापात्रभूतोयं महाकालो गणाग्रणीः॥ न
वहस्तांबुजस्पर्शाद्धिताननु राक्षितः॥ इति देवं प्रणम्येंद्रपूर्वकाः बुधा अब्रुवन् वि
विबुधा ऊचुः॥ धन्यस्त्वमसि भूपाल महाकालपराश्रयः॥ त्वद्भाग्यस्य नान्तोस्ति
शिवैकशरणः सदा॥ इत्थं देवैस्तिरोधत्त महाकालेन शंकरः॥ त्वं चापि गणपश्चो
भविष्यसि न संशयः॥ एतत्कथानकं पुण्यं महाकालगणाश्रयं॥ श्रुत्वा द्विजेषु सत
तं भवभक्तिं लभेनसः॥ सूत उवाच॥ चित्रसेनो विचित्रार्थी चित्रे च प्रियसत्कथां॥ श्रु
५ना त्वाथ नसणाय त्र्याः द्ववं देतं पितामहं॥ सनंदूधमुनिभिः समारोपितस्त्वयाजयन्॥ म ॥१६॥
हाकालं प्रणम्येत्रांगीवीणागणवंदितः॥ स्वंधामहं सयानेन यथोप्रासनः सुरैः॥
महाकालार्चनोत्तांतेचित्रसेनो गणोभवेत्॥ येनानेन महाधूर्तैर्विधिकृते गोत्रा
नकुंन्याद्भिर्भूदानेश्वरापहारिभिः द्विजवरैरंगेनेश्वर्यस्यासूक्तं॥ तेनैवारिवल
घोरपातकहारिणंचिंत्तलभेघोभवीं॥ धन्यः शंकरकिंकरः शिवमनुव्याहारमात्रा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दृरः गौरीशंकरस्मादरः सितलसद्भस्मत्रिपुंड्रादरो रुद्राक्षाभरणः शिवेकशरणः कश्चिद्द्वे द्वैकलो

इति श्रीशिवरहस्ये पंचमांशे षष्ठोध्यायः ॥ सूत उवाच ॥ पुनः पप्रछ सा देवी पार्वती परमेश्व

रं ॥ प्रपन्नानंद जननं जगज्जनकमीश्वरं ॥ पार्वत्युवाच ॥ महादेव महानंद करुणारससागर

श्रुतमुत्तममाख्यानं महाकालगणस्य च ॥ किं वान्यदस्ति जनक क्षेत्रमस्मिन्महेश्वर ॥ क्षेत्रा

णां च पतिः शंभो विशिष्टं वक्तुमर्हसि ॥ ईश्वर उवाच ॥ क्षेत्रमस्य कमुत्कृष्टमुत्कृष्टकमलान

ने ॥ ओंकारं नामविमलं कलिकल्मषनाशनं ॥ तत्र शैवा निवसंति सहस्रशः ॥ ते स व

र्वे मम लिंगार्च्यां कुर्वंसेव प्रतिक्षणं ॥ भासिता भासिते निर्यं शांता दांता जितेंद्रियाः ॥ रु

द्राक्षवरभूषाद्याः फालाक्षन्यमानसाः ॥ न चास्ति सरितां श्रेष्ठा लिंगसंगतरंगिता ॥ न

र्मदा शर्मदा नित्यं स्नानाल्लानावगाहनात् ॥ पापौघसं[illegible]भंगाद्या वातुपानसुशीतला घ

तत्रास्ति कुंडमुत्कृष्टमोंकाराख्यं शुचिस्मिते ॥ तत्कुंडदर्शनादेव मल्लोके निवसेच्चिरं ॥ तत्कुंडोद

कपानेन हृदि लिंगं प्रजायते ॥ प्रावाः पिबंति तत्कुंडजलं शीतं विमुक्तये ॥ तत्सिंप्रयांति पितरः

त त्कुंडजलतर्पिताः ॥ सदा तत्कुंडरक्षार्थं गणाः संस्थापिता मया ॥ कुंडधारप्रमुखनयः शू

लमुद्गरपाणयः ॥ गजेंद्रचर्मवसना मृगेंद्रसमविक्रमाः ॥ हरींद्रानपितेरन्युर्भिरींद्रसमे

विग्रहा ॥ धनुःशरकराः सर्वे जटाशोभितमस्तकाः ॥ अग्निशिखादिपिमंत्रैर्भस्माधूलित

विग्रहाः ॥ संग्रामसुरवराः सर्वे गणा मे दुरविग्रहाः ॥ कदाचिदनुज्ञाप्य तान्गणान्मदर्पितः ॥

अप्सरोभिः परिवृतो मरुतांपतिरुत्पलः॥ आरुह्यात्र मुनाथं तं क्रीडितुं न मदाऽऽकुले॥ स
माजगाम तत्र मितो गन्ध्यासांक त्रिभिः वेतदा॥ [illegible] तं गणपाः क्षुधाः सर्वेभ्यतिमन्यवः॥ सगजंपा मे
नयन धौ गन्ध्यासाकं सुरेश्वरं॥ सुरांस्तदा स वरुणान्विभिदुः पवनानलान्॥ निस्त्रिंशावरधा
मे: राभिः सुतीक्ष्णाभि[illegible]स्त्रिशूलीमुखैः॥ मुद्गरैर्भिंदुश्चान्ये सवाहान्सुधभूषणान्॥ विवाहनोत्सहा
हृदयांस्तु वद्रक्तास्वलप्रदान्॥ कांदिशीका मुक्तकेशा नक्षणाश्च गुणेश्वराः॥ अप्सरास्ता
११ व विकैराहृदं यो मुक्तकेशमूर्धजाः॥ हाहा वेतेति कृंदंतः स्ववद्रक्ता ईवाससः॥ तथा देवगणाः
सर्वे शक्राद्या भयकंपिताः॥ ॐकारं तत्र तल्लिंगं शरणं जग्मुरीश्वरं॥ देवाश्वरसमुचुः॥
महापुण्य संगं कलानंग भंगं सुगंगा तरंगैः पिशंगं जटोत्तमहेसांग संगं महालिंगमोंकार
मीशं प्रपन्नाः॥ विनायकवाहसुपूजितपदं विनायकगुरुं विबुध मानसांतर्गतं॥ विरोधि
तमहांबुधिप्रणतमीशमानुगामुखं न नास्म भिवमोक्षतिप्रवलिंसंगे स्थंशिवं॥ इत्थं संस्तुव ण
तां तेषां शक्रादीनां महेश्वरः॥ ॐकारमूललिंगात्स प्रादुरासीत्कृपानिधिः॥ अनंतसोम
सूर्याग्नि विद्युत्सदृशविग्रहः॥ पिशंगित जटाजूटतटबद्धार्धचंद्रकः॥ उमावामार्धसंरा २१
जन्होगिभोगविभूषणः॥ त्रिशूलोद्यत्करालानमेडरुधनिडंबरः॥ चंडतांडव संनाहपिंडि
ताखिलभूघ्नतलेः॥ भस्माधूलितसर्वांगः स्त्रिपुंड्रोज्वलफालकः॥ देवान्संह्लादयन्दे
वः शंकरश्चेंद्र ईश्वरः॥ घनगंभीरघोषेण वाचमुच्चैमरान्प्रति॥ ईश्वर उवाच॥ लिंगमे
तत्सुरश्रेष्ठाः मुक्तिदं दर्शनात्सदा॥ ब्रह्मविष्ण्वादिविबुधैः पूजितं सर्वकामदं॥ अस्यालिं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गस्य महिमा वेदैर्न ज्ञात एव हि ॥ कृतादिषु परं लिंगमोंकारप्रभवं सुराः ॥ लिंगे तत्त्वं न गणा वेदाः
सांगोपनिषदास्तथा ॥ ॐकारश्रुतिरेवात्र दृश्यते न न थाश्रुतिः ॥ अत्रेतिहासं वक्ष्या
मि शृण्वंतु सुरसत्तमाः ॥ पुरा कृतयुगे देवा दैत्यास्ति महमाश्रिताः ॥ स्वाहा स्वधा वषट्कारं न
पिता पितरः सुराः ॥ निजघ्नुरसुरानीकं संततमरारवधिक्षिपि ॥ दैवैः संधर्षिता दैत्याः शुक्रं १३
ख्याद्याः सुमहाबलाः ॥ शुक्रं संमान्य संमन्त्र्य पौरोहित्ये व्यवस्थितं ॥ तं प्रणम्याथ ते सर्वे शुक्रं ख्या
पादितिजोत्तमाः ॥ विनयावनताभूतात्मा हुद्विजसत्तमं ॥ दैत्या ऊचुः ॥ संग्रामे भृशमुत्सा देवाः
पुनराप्यायिता द्विज ॥ स्वाहा स्वधा वषट्कारैः सामाज्य हविषा सुराः ॥ आप्यायंति प्रहृष्यंति
ध्वंसस्त्वा पुनरेव हि ॥ उपायं सर्वदास्माकं विजयायाद्य भार्गव ॥ इति दैत्यमुखाच्छ्रीनं वाक्यं
श्रुत्वा स भार्गवः ॥ विचार्य तपसा दैत्यानिदमाह प्रहर्षयन् ॥ शुक्र उवाच ॥ देवाश्च बलिनो ये
न यूयं हीनपराक्रमाः ॥ देवानाप्याययंत्येते ऋतुभिर्मुनयः सुरं ॥ स्वाहा स्वधा वषट्कारैस्तेपि
वेदेषु संस्थिताः ॥ विदान्त्रस्य हरत अणीवां तजलेशयाः ॥ वेदेष्वथ विनष्टेषु विनष्टाः सुरसत्त
माः ॥ यज्ञभागविहीनाश्च निःस्वाध्यायवषट्कृताः ॥ यज्ञहीनं जगत्सर्वं क्षीरमोषधिवर्जितं ॥ ही
य बाह्मणा नाग्नौ गावो नश्यंते वृष्टिवर्जिताः ॥ तेषु सर्वेषु नियंत्राः विनश्यंति सुरासुराः ॥ भवतां वशगं भूय
स्त्रैलोक्यं सचराचरं ॥ इति शुक्रवचो वाक्यं दैत्या सुरमुखाः सुराः ॥ ब्रह्मलोकं तदा गता मूर्तिभूता

वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तथाश्रुतीः॥ अहंपारीषदान्तू हत्वाजहौ रामस्सूदन॥ वेदाः सांगोपनिषदः पुराणागमसंयु
२ ताः॥ संहृत्य सर्वे दमखिलमर्णवं प्रविवेशाह॥ नष्टवेदस्तदा लोको निःस्वाध्यायवषट्कृतः॥ शक्राद्याः
खेदमगमन् विवर्णवदना सदा॥ कृशाङ्कुरे तानि हृद्(?) मोधामहीनोनि दीनवाक्॥ वायुरप्यग्निर्हि
न श्च चलितुं चापि न क्षम॥ रुग्णाः सर्वरूपो भीत्याव जीवी निमव र्जित॥ कुबेरः स्तूनवेरश्च
त्रुं कान्तं कान्तिनीत कः॥ मुनयः क्ष्णुनष्टा विद्यास्यका चाराय थाचथं॥ इत्येवं निर्दुते लोके यलोत्सव
विवर्जिते॥ देवास्ते नमंदामे स्वरूना लाभस्मविभूषिता॥ रुद्राक्षमाला भरणाः रुद्रसूक्तं जपादराः॥
क्राको दरम हा हारसंदाराः स्मरसन्नमा॥ शरपातेयकुः सर्वे वनीकृतगेयोद्रियाः॥ सुधामपि बु
धा मुधा पित्तगया स्वधामप्यहो विनिंद्य अनिमाशादान्तुविवि धकष्ट धर्मिधमान्॥ भजंति नित्यं
नमरा हरिणपोतगभीर्थिकस्फुरत्सुरै उडाट निटिल्लोचनं शंकरं॥ महेश्वरमुमासखं समनमं सरि ५
दहासोन्मुखं चिदादिम भवत्सु खंम(?)हाराग्निवायोन्मुखं॥ अनंगपुरभेदनं त्रिपिनद्दक्षकाले
न्मुखं सुशांखपरिपीडितास्तुरगयायमुत्संसुखं॥ इत्थालिंगमहोंकतिश्वरस्तुधाकृद्दिरखंड
द्रवापारावारनिदान सारस्तुभगं देवाः समभ्यर्चय॥ फुल्लैः पुष्पमरंदसोरभगणैः नैवेद्यधूपा
दिभिर्वाधैः श्च दनवंदनैः स्तुखमुखं संतुष्टुवुस्ते त्रिवं॥ ॥देवा ऊचुः॥ ॥कांतंकारणकारणं ॥१८॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

करलसत्कल्याणभूभृत्स्वन्त्कः कपर्दीरामकलेवरं केतुपर्णिकारूप्यसारकरं॥ कामारातिमकामि
नां सुकृतिनां कैवल्यदं कामदं संभाषाः पूरणं कलानिधिकलाराजज्जटं भूंकरं॥ खद्योतेंदु
शिखिनेत्रं शमनमखमुखखेचरास्त्रो नमांगं खर्वं खर्वीदं खर्वं जगति मुविदितानाद्रसुनो खर्वीसोपि॥
खंडेनेंदोः कपर्दे खचितममरमुखखस्तु स्वमार्कु प्रियेष्टं खेदोस्तानायमाभान खदलितकंकं
खंडिलादि॥ गोनेत्रं गोत्रायेष्टुं गगनमयमनं मित्यगो मोर्छिगम्यं गोरशीं गोधिगोधिं स संडिना
कलगुरुं गुरुं गोजं गोपत्रपत्रं॥ गोपन्नं गोपपक्षं गुणगणसहितं गोधरेंदुजास हार्थं गो
जाये गोजारूपं गलगलितविषं गोभिरानिरुक्तमोघ॥ घर्मांते दीर्घ स्मे घणाभिरप्रचोये घ
घर्मघट्टे घनानेवाघौघे दीर्घदीर्घैरभिनुमपघनं कुमाथंमोनधींद्राः॥ द्राचीयां संनव
वांघ्रिं घुरस्पासमघ्यं कामघातिं गणामोदी वीणामान्यपिविमलधियः शीघ्रमेवेसशा
मः॥ चारुस्मेरमुखं चराचरविभुं चापीभंदं चपरं चक्षुःश्रोत्रविभूषपांचलदृशां संश्लिष्ट
वामांगकं॥ चित्ते चीरवसां चिदात्मकनयासां चिंतामानं चीरं चेमोक्ष हेरच पंचिरू
चित्ते: संचिंतयामः निशां॥ गछामोबहुविलवसंतेनवनंतत्राछ्छकुं पयः स्नास्याभो
घवसंतसरद्धिरणेः संतमगाचावयं॥ रुद्राक्षैः सितभस्मपूरनिकरे रुधुं नयामसनुं यास्यानो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यसुनिर्द्देति शिवमहादेवेति संकीर्तने ॥ इति श्रीशिवरहस्ये पंचमांशे सप्तमोध्यायः ॥ सूत उवा
१९ च ॥ इत्थं गीर्वाणवाणीं तां श्रुत्वा शम्भीशासंस्तुतः ॥ उवाच हर्षयन्देवा छंकरो लोकशंकरः ॥ ई
श्वर उवाच ॥ स्तुतो नया यसुप्रीतो भवतां सुरसत्तमाः ॥ ईप्सितं वो वदंत्वाशु तद्दास्याम्य
हमव हि ॥ सदाशिववचः श्रुत्वा प्रणम्येंद्रमुखाः सुराः ॥ इदमूचुर्वचो हृष्टा विनयावनतानना ॥
देवा ऊचुः ॥ भवा वयं खनामाद्य देयास्यान्बाधते भृशं ॥ त्रिविष्टपात्याविताः स्मो जीवामः
कष्टजीवने ॥ ब्रह्मणः प्रसभं हृत्वा वेदान्सांगान्महेश्वर ॥ वयापदिष्टान्विश्वेश सत्रासि
भुवनत्रयं ॥ निःस्वाध्यायवषट्कारा लोकाः संप्रति वर्त्तते ॥ यज्ञभागविहीनास्ते हलस्वर्गीहते
जसः ॥ शरणं त्वां प्रपन्नाः स्म पाहि नः शरणागतान् ॥ पुनः प्रणम्य विश्वेशं भक्त्या तुष्टुवुः ॥ दे शिवरं
वा ऊचुः ॥ जगदुद्भवनाशसंस्थितिप्रलयापारगभीरसागरं ॥ भगवंस्तव पत्कनावा भाग ३
परपारं समुत्तरेम हे ॥ कनिष्ठं वरिष्ठं तथा ज्येष्ठमीशं गरिष्ठं वसिष्ठादिसंपूजितांघ्रिं
विशिष्टं सुरपां विशिष्टेषु पूज्यं नताः स्मो नताः स्मो नताः स्मो नताः स्मः ॥ सूत उवाच ॥ १९
देवान्संपीडितान्ज्ञात्वा सस्मार गणनायकं ॥ नंदिनं नंदितानेकविबुधव्रजसंस्तुतं ॥ स्मृत
मात्रः शिवेनात्र प्रणतः संस्थितः पुरः ॥ बद्धांजलिकरस्तूष्णीं किं करोमीति शंकरं ॥ सम्पृ
तुष्टाव हृष्टात्मा नंदीशो गणपाग्रणीः ॥ नंदिकेश्वर उवाच ॥ शंभो सचंद्रकलाम सोम
भगवन्विश्वेश विश्वाधिकब्रह्मेंदुसुरदाम्यच्छायामानयनापारव्यथां संहर श्रीमत्संज

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हुं

यै देवै स्तुभवेन्नः पादारविंदं सदा ध्यायं ध्यायमथाहं हरामि सततं तल्लिंगसंपूजनात्॥ पा
पं शानं मपायद्वा नर हि तो ध्यायं श्रीयं पदौ हायं दुःखमनोषसंस्तिभवं तद्वक्त्रं संसेवनात्॥
३ पा लभ्यो न्याम रूपुजनं च भगवन्नायन्तुयक्रमः कायं प्राप्य विमुक्तये हि यतते भक्तः सदा प्रेरितः॥
नंदिकेश्वरा महास्कंसानंदितः प्राहतं त्रिवः॥ महानंदघनः श्रीमान् नंदिनो लिंगदर्शनात्॥ ईश्वर उवा
च॥ गणेंद्र शंकरः श्रेष्ठ गणेश्वैः परिवारितः॥ गच्छ वैकुंठभवनं समानय हरिं द्रुतं॥ देवानां का
र्यसिध्यर्थं मास्तु लं स्तुयत्नापते॥ तथेति तत्वा देवेशं नमस्कारं कृतकेशवं॥ ययौ द्रुतं विमाने नग
णेंद्रैः संस्तुतः सदा॥ भस्मोद्धूलितसर्वांग श्रीगलिंगार्चनेरतः॥ नंदीश्वनंदयनलोकान्
श्रगामादौ त्रिविष्टपं॥ महेंद्रेण गणो देवैः पूजितो भोजितस्तदा दृष्ट्वा चानाम ... करिश्व
पादांबुजार्चकं पप्रच्छ नंदिकेश्वरं संवहस्य जितमनोस्थितं॥ नंदिकेश्वर उवाच॥ ॥त्रिविष्ट
पसुखं प्राप्य त्रिपिविष्टार्चनेरतः॥ दूरदृष्टि विनाशाय मन्ये छं श्रीरूपांगतः॥ नंदिके
श्ववचः श्रुत्वा महेंद्रः प्राह सांजलिः॥ शक्र उवाच॥ श्रीं खास्तुरे पंदेवानां महद्भय
मुपस्थितं॥ नंदने सरसा पूर्वं रंभासंभोगकामिना॥ चंदनांगे न च मया नंदनादि समा
दृतः॥ सुखतल्पगतः श्राहं मारसायकगोचरः॥ नार्चयं भगवत्पदांबुजं महो पुण्यप्रदं

षषहंलिंगंपुण्यपवित्रंनीलमहाकर्णीरेस्तदा॥ प्राज्येमीद्याज्ज्वद्युध्येवीरद्धिचिस्थि
तयाचंदनांघेश्चहृद्येमेनेर्घेनहुबिल्वपल्लवस्तुमेसोनेदत्रींद्रुगतिं॥ संप्राप्तोस्मिरु
रास्तुरेश्वविहितैर्नेवाभवन्नोजयोच्छ्रोत्रौंडस्तुदप्रमुरेवस्पृष्टेवैः सन्नास्तितेमरुद्रेरे॥ दे
वैर्वीहितऋषणादिरहितैर्नेष्टसद्वाविष्टपंकर्तुंप्राप्तमहागणेंद्रभगवत्सदाद्याचीताही
नत्र॥ दुःखमितंस्वनकुतानंदिकेश्वोमसाधिपां॥ प्राहतिगिनयोपेतंप्रद्वेषाचीन
वेभवं॥ ॥नंदिकेश्वरउवाच॥ दारिखापविमध्यमस्त्वनुदिनंपुण्यप्रदेवेलिंगेत्वसंपूज्या
मलविल्वपल्लवलवेनैरिः फलेनीहेरा॥ संप्राप्यप्रमथादिनाथपदवींशंभुमोपरंजा
यसेदत्तोत्तुंगनूरंगदंतिनिनवहेशंभुमंडलेमोचप॥ अतः परंऋषिविभूषणस्त्वं
लिंगंसमभ्यर्च्यस्तुरेस्समेन॥ पुण्यप्रदेषेपुजयायवराजिन्प्राप्तोषिभाग्या
त्यभिमानितानि॥ इत्युक्तोनंदिकेश्वरस्मनकुलाप्यगणोत्तैल॥ विमानेनार्कवर्णेन
ब्रह्मधामसमाययो॥ ब्रह्मणापूजितस्तत्रनिषण्णः परमासने॥ उवाचदेवंब्रह्मा
णंनंदिकेशोगणाग्रणीः॥ ॥नंदिकेश्वरउवाच॥ ॥पद्मासनकथंचित्तमद्यनाभवतः
सदादेवानांकार्यसिध्यर्थंस्मारितः शंकरेणहि॥ विष्णुलोकेजितस्तत्रधर्मस्मा ॥२०॥

इच्छामि वेगतः॥ दीनोसि नितरां ब्रह्मन्नूरुष्टि (?) व्यापरवर्जितः॥ सदस्येश्चापि विज्ञैश्च यथापू
र्वं नितेसभा॥ इति पृष्टो गणेशेन उवाच चरो(?)तुननः॥ ब्रह्मोवाच॥ पूर्वं तपस्यता लब्धा मया
वेदाः प्रसादतः॥ महादेवस्य वैनं शिनू पूर्वमीशान वक्त्रतः॥ योवेदादिः स्वरः शंभुः
वेदांतमहिमा शिवः॥ मांधान्मदाञ्च तत्पूजाच पात्यत्कदुरात्मना॥ शंखासुरेणमेवेवदा
हृता नष्टस्मृतिः सदा॥ रतिकर्तव्यता मूढश्चिंतया संस्थितोस्म्यहं॥ शांगांगसंगतश्चा
यो देहैर्लोभवन्मतिः॥ महादेव महालिंगपूजाध्यानार्चनादिषु॥ विस्मयं परमं गत्वाशु
वाच ब्रह्मणोवचः॥ उवाच पद्मजं नंदी स सदस्यं प्रहृष्टवत्॥ नंदिकेश्वर उवाच॥ भ
वान्लोकनिपुंता हि कथं त्वां मोह आविशत्॥ महांतोपि च मुह्यंति कालकाल हृषीक्षि
ताः॥ धन्यानां परमेंदुचूडचरणांभोजार्चने जायते श्री रुद्राक्ष विधृ (?) पूषणोसितलसद्र
स्मत्रिपुंड्रे सदा॥ रुद्रावर्तनपंचपातकरे हे पंचाक्षरे सुस्थिरे सायं बिल्वदलैश्च पूजन
मतिः पुण्यैः परैः॥ कोवा प्रदोषसमये शिवलिंगपूजां कर्तुं यतेत विभवे रथिषेच नीथैः
त तावदंतकरिपुंगमाथाधिनाथं देवासुरैर्नितप्रणमंतितदंघ्रियुग्मं॥ नजानंति गो
रीसहायो रुगायं महायोगसंसिद्धिकार्यसरवायं॥ कर्पूरखंड समितारुधितो भि

भ

कार्यं वंदे महेश्वरमहं नमुमा हो सेव्यं ॥ ब्रह्माणं समनुज्ञाप्य ययौ श्रीनंदिकेश्वरः ॥ ततो ग
णेश्वरैर्युक्तो वैकुंठभवनं ययौ ॥ विष्वक्सेनादिभिस्तत्र शोभितं वैष्णवैर्गणैः ॥ स तै
र्निवेदितो विष्णुः सार्घ्यहस्तस्समुत्थितः ॥ समाययौ बहिर्द्रष्टुं नंदीश्वरमुखान्गणा
न् ॥ ददर्श च विमानाग्रे स्थितं नंदीश्वरं गणैः ॥ तुलादिनमुदारांगं द्वितीयमिव शंकरं
विजनविपिनवानपीतहूनानुगगनाभोगविहारचारुसिंहासं ॥ भवद्ध्यानस्वप्र
६ता भाभिरीशानं छिवभक्तानंदवर्धनः अथवास्तु देवः ॥ प्रणम्य कुसु[illegible] पूजयामा
स नंदिनं ॥ भोजयामास शुद्धान्नैर्महेश्वरनिवेदितैः ॥ समभ्यर्च्य महालिंगमिंद्र
नीलमयं हरिः ॥ बिल्वपत्रैः पुष्पैर्दीपैर्नंदिकेशेन संयुतः ॥ शतसहस्रकं लिंगमू
र्जा स्वेषु लिंगेषु सत्तमाः ॥ कुंकुमं जुष्टं परं दृष्ट्वा विष्णुना गणपालकाः ॥ सोत्साहं नं
दिनं विष्णुः सोपचारमथाब्रवीत् ॥ विष्णुरुवाच ॥ भवन्द्रसंदर्शनं जातं मम धा
फलं प्राप्तम् कृष्णा महादमप्रापाः महान्वै संगेन ज्ञानगः प्रपन्नो भवतो बनहां नम २न्तु
लोगणेशः ॥ किमागमनकं संनेनंदिकेशात्र भवद्ध ॥ भवदागमने हेतुर्ममैष्टं ये कारणं
न वेद ॥ अनंगारिपुरस्थं मिथितुष्टोनसंयुतः ॥ तव पापात्र[illegible] मम श्रीः स्तुयत्ना ॥२१॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नते॥ मद्देहमंगलान्ये न भवं सेवपदे पदे॥ चंचलापि सदा लक्ष्मीः स्थिरा मयि द्विजान्वीनानु
नंदिकेशस्तमाहेदं श्रुत्वा नंदेश्वरं वचः॥ नंदिकेश्वर उवाच॥ ॥ रमापते महेशस्य रूपा पूर्णि
चविस्थितं॥ शिवालिंगेपोको सि संयतः शिवपदाश्रय॥ शिवलिंगार्चनरतो भस्मफालः सदामलं॥
रुद्राक्षधारको सि त्वं पंचाक्षरपरायणः॥ नीलकंठायदमध्यस्थाविल्लैं धृते व भास्वरः॥ त्रिपुंड्रे
खास्ते देहे भांति पापविनाशकाः॥ त्वयि प्रीतो महादेवो जगन्मां पालने रतः॥ देवानां कार्यसिध्यर्थं मा
जुहावामरोत्तम॥ नियोहि देववदेवेशं द्रष्टुं नः शूलिनं स्वयं॥ शैलाधिनो वचः श्रुत्वा समारुह्य रथ
गाधिपं॥ नंदिना सजगामाथ द्रष्टुं देवं पिनाकिनं॥ अवनीपीरवगा द्विष्णुः विमानाग्रा द्रुतो
श्वरः॥ स्नालाथन्नभीदामेयि भस्मरुद्राक्षभूषणा॥ दृष्ट्वोंकारमहालिंगं अष्टांगस्पृष्टभूतल
प्रणेमुः प्रमथाधीशं रुद्रकुण्डस्थमुहुसदा॥ गणेश्वरसमुच्चुः॥ नमस्कार महेश्वर प्रबल पाप
तापंहर गरादर गिरींद्रजाकुचगिरे विहारादर॥ गदाधरमुखामर प्रवरधीर गिरीश्वर
प्रसीद परमेश्वरजनिजरामृतिं संहर॥ समागतोयं त्रिलोकेश विष्णुस्त्रैलोक्यपालकः॥ देवानां
कार्यसिध्यर्थं माशापय महेश्वर॥ नंदिकेशगणानां च श्रुत्वा वाक्यं महेश्वरः॥ सुधार्द्रकरुणा
दृष्ट्या फालाक्षो विष्णुमैक्षत॥ नदा नंगहरापांगसंगानंदांगसंगकः॥ लुष्टाव प्रणतः शंभु २२
मोंकारेशं महेश्वरं॥ विष्णुरुवाच॥ ॥ ॐ प्रपन्नानाथ त्वां शरणद सुरापामभयदं सुपर्णी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रुपेः धीराद्यैः सुरगणगणैर्दैन्येन तप्तं॥ गारंगीर्णकंठ भयहर महार्णवगतं परं त्राणभो तूर्णं भवं दभयपादा
भ्यमीगतिं तं॥ मार मार सुकुमार पितस्त्वं भार याम्बुपवजालकृपारं॥ पाहि पाहि परमेशममाद्यं ईशया ना
तः सु दुरदृष्टकष्टजं॥ नेदृशं विद्युप्रयात्मभिः संस्तु परमेश्वरः॥ प्राह भगवान् अथ वाचा तं सुरारिपुरो
घसितः॥ ईश्वर उवाच॥ त्वं खयाग्यादितिजादिविष्णो हवा वेदगणा सुरान्॥ बाधते सततं दैत्या अर्णवान्त
॥२२॥ र्जलेशयाः॥ मत्तेजसा पूरितस्त्वं पाहि सुधाय वेहर॥ जयशील भविता नूनं मंथयिवेदानघाः पुनः॥ मात्स्यं
कृत्वा महद्रूपं मणिवान्त र्जलेशयः॥ दशवर्षसहस्राणि शतयोजनमुन्नतः॥ भोच्येथ न्याध्रुपदि
कोमनोकालांतरे पुनः॥ हिरण्याक्षो हि भविता स एव कुरिपुः पुनः॥ भवितादितिजेन्द्रार्यः शक्रं भा वा
वयिष्यति॥ स्थानात्सुरगणैः सार्धं तस्य युद्धं भविष्यति॥ भूत्वा यज्ञवराहस्त्वं हिरण्याक्षं हनिष्यसि
हिरण्यकशिपुं चापि संगे सार्धशरीरभाक्॥ भूत्वा खरो गन्नखरे नखैः संदारयिष्यसि॥ दितिजां
ग महासंगविसह स्त्वं भविष्यसि॥ तद्रूपा नाम तत्त्वं जगत्संशोषयिष्यसि॥ तदा देव जगद्रक्षा
निशार्थं वासुरोत्तम॥ मास्य वाराह सिंहार्ध शरीरं संहरान्यहं॥ तद्दं धारयिष्यामि सिंहच
मीबरं पुनः॥ शारभं रूपमास्थाय तवान्यादनिरन्तये॥ मभादपूजके नाय भगुणाशादिनो ह्यसि
नमस्ती नाश दुःखेन तस्यां तत्स्रोभविष्यसि॥ इत्थं संप्रोक्तो वचः श्रुत्वा विष्णुर्नत्वा महेश्वरं॥ जगाम्मार्णव
न मुद्दिश्य देवसंधैरभिष्टुतः॥ अर्णवं गहृदे सजातभी साफलपर्णिशक्ति नोऽप्यवन सुधां धसः॥ उत्क ॥२२॥
श्याभिहिरं भजं गितूर्णं तमपर्णापति मेकमीशमाद्यं॥ मात्स्यं कृत्वा महारूपं स्फुलिंगोग्रमलोचनः॥
दशयोजन नमोन्न संज्ञात योजनमायतं॥ दंष्ट्राकुराळपुच्छाग्र विघाहितमहागिरिं॥ तरंगोत्थ महा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वातघोरारावकृतार्णवं॥ फेनडिंडिमसंराजत्तरंगास्फालघट्टितं॥ तेनासुरेणमहतातथान्येदीन
कोत्तमैः॥ दशवर्षसहस्राणियुधमुत्तमनातनात्॥ वक्रतुंडागमनिघातैर्हीढाघातेस्तदासुरा
न्॥ हत्वातांस्तंमहादेवंदेवसंघैरभिष्टुतः॥ जगामादायतान्वैदाढिवतेजोपबृंहितः
तच्छरीरंमहामात्स्यंकेदारनवैपाहरः॥ विसर्जयामासतज्ञवैविनिर्जये॥ मत्स्यापात
मभूत्तीर्थंपश्चिमांभोधिमध्यमं॥ तत्रस्नात्वाथसंतर्प्यपितृन्पूयेतमानवः॥ दत्वैवेदान्
महेशायवेदवेद्यायवैहरिः॥ प्रणम्यदेवदेवेशंजगामस्वनिकेतनं॥ ॐकारेश्वरलिंग
मध्यविलसद्दोषास्तदातसुरादृष्ट्वाचांकृतिमात्रकैस्तप्रभुतिर्वंतेवैसदाविस्मिताः॥ स्तुत्वा
स्तस्यमपारवेदशिखरैरूद्बुधबोधप्रदंतंसावंमुहुराद्यहद्यवचसाधामस्वकंतेययुः॥ ॥
इतिश्रीशिवरहस्येपंचमांशेअष्टमोध्यायः॥ ईश्वरउवाच॥ एवंचिरगतेकालेसामभाग
विवर्जिताः॥ ॐकारेशंमहालिंगंजग्मुःशरणमीश्वरं॥ प्रणम्यतुष्टुवुर्हृष्टाश्चिविष्टपैश्वराः
देवाऊचुः॥ ॥कोशांभोमरूतांपितस्तवकथापीयूषपानेवयंजीमोवांयसुधालवेकांक्षिता
मेघोत्थपाथोलवैः॥ यद्दत्तद्दुमासहायभगवन्गोरेयथातर्षिताः॥ सोमंचापिमहाध्वरे
षुसततंपीत्वासुरैस्तप्यसि॥ क्षुक्षांतांभगवंस्त्रिविष्टपगताःसत्राशिनःसवेदावेदोत्थाः
सकलाःक्रियाश्चभगवन्पूर्वंत्वयाकल्पिताः॥ वेदास्त्वप्यखिलान्दस्त्वविधयवेदान्मखादि

२३ क्रिया सर्वा विप्रगणेषु चाद्य विलता भयात् सर्वे नो मुदे ॥ इति सुरवचनं निशम्य तुंभुर्मुदि
तमनाः समुवाच हर्षितमुखी ॥ गच्छत निधिना समागता स्थ त्रिदशा वरा श्रुतिजालमेन द
र्शने ॥ प्रदिशामि तथा मायया भवत्सेवां नभुपास्यैः सदानुगच्छत ॥ भागसबोदि इति मद्वचनात्सु व:
रेंद्रा नु संप्रोच्य वाग्निरखिलसुरासुरवर्गवंद्यः ॥ शंकराज्ञानुसारेणाजग्मुः शक्राद श्री
यस्तदा ॥ सुरा ब्रह्माणमासाद्य प्रणम्याभिप्रसाद्य च ॥ खिन्ना स्त्रिविष्टपं प्राप्य भाग
हीनाः क्षुधार्दिताः ॥ नत्वा प्रांजलयः सर्वे शक्राद्याः पंकजासनं ॥ इदमूचुस्तदा देवाः
कृतांजलिपुटा धनाः ॥ देवा ऊचुः ॥ हता वेदाः पुरा दैत्यैः शिवाज्ञाकारिणा पुनः
हरिणा संहृता ब्रह्मन्नधुना लीनाम हेश्वरे ॥ वेदहीनेषु विप्रेषु नयज्ञः संप्रवर्तते ॥ य
ज्ञैर्विहीने भूलोके नास्माकं दीयते हविः ॥ क्षुधा विह्वलिता नाथ वयं सर्वे त्रिविष्ट
पगता अपि ॥ क्षुधापनुत्तमनोपायः शीघ्रमत्र विधीयतां ॥ इति गीर्वाणवृंदानां
श्रुत्वा वाक्यं पितामहः ॥ ध्यात्वा चिरं तदा देवानिदमाह जः सुरान् ॥ पितामह २४
ह उवाच ॥ प्रसादरूपे मे शान नमो कारेश्वर मव्ययं ॥ न ह्या भगवतो वेदान्न प्राप्स्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मीतिमलिमिम॥ वेदाध्ययनाः प्रवर्तन्ते पठंति द्विजपुंगवाः॥ भवंतो भागधेयाः स्युर्गच्छध्वं त्रिदि
वं पुनः॥ इत्युक्त्वा स्त्रिदशाः सर्वे नदा त्रिदिवमागमन्॥ कालेन कियता वेधास्तप्त्वाथ परमं त
पः॥ विधाविधिं समास्थाय ॐकारं प्रापनक्षणात्॥ भूमिदानं मर्दा प्राप्य स्नात्वा नत्वा जि
तेंद्रियः॥ भस्मोद्धूलनपुंड्रांको रुद्राक्षस्रग्गिरुज्ज्वलः॥ जपन् पंचाक्षरं मंत्रं शिवमोंका
रमीश्वरं॥ समभ्यर्च्याथ विल्वाद्यैः सोपचारैरनेकशः॥ तदग्रे संस्थितो विप्राः पंचाग्निषु
सप्तमासु॥ प्रजपंश्च तु रुद्रीयं भस्मच्छन्नो जितासनः॥ वर्षमेकं निराहारो वायुपर्णांबुभोज
नः॥ दशवत्सरपर्यंतं महोग्रं तप्तवान् तपश्चरन्॥ ॐकारलिंगनिलयं ध्यायन्देवं त्रियंबकं॥ एवं
तपस्यतस्तस्य प्रादुरासीत् पिनाकपतिः॥ ॐकारलिंगमध्यात्स शूलपाणिर्महेश्वरः॥ नीलकंठो गि
रूपाक्षः शूलोद्यतमहाकरः॥ गंगातुंगतरंगौघधूर्जटीकंपकपर्दकः॥ अष्टमीचंद्रसंकाशक
पालविलसत्करः॥ देव्या स्कंदेन हेरंबनंद्यादिगणपैर्वृतः॥ सूर्यकोटिप्रतीकाशः चंद्रको
टिसुशीतलः॥ तादृशं देवदेवेशं दृष्ट्वा हृष्टोऽब्जजः॥ शिवं प्रणम्य परया भक्त्या तुष्टा
व जगदीश्वरं॥ ब्रह्मोवाच॥ शंभो शंकर शांत शाश्वत शिव स्थाणो भवोमापते भर्ग भर्ग त्रिपु
रांतक त्रिनयन श्रीकंठ कालांतक॥ सर्वेशाय भगीभीमज गतां नाथाद्य श्रीनिधे रुद्र
शांत महेश्वर महादेवेशानुकंपन॥ तुंगलिंगनिलयामल शंभो बिल्वहारपरिशोभित लोके नूपाहि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ई शंभ्वासुरस्तापेता:

सोमथितमन्मथदक्ष पाहि मामखिलदु...खसमूहात्॥ त्वं कृपालीकिश्रुतिजातकीर्ति र्विनाशा
याघोघपरं ममाद्य॥ पतिः पशूनामथ चेतनानां नियोसि विश्वाधिक विश्वमूर्ते॥ इति स्तुवंतं ब्रह्मा
॥२६॥ णं प्राह देवो महेश्वरः॥ देव्या दत्तवरः शंभु र्गणसंघै स्सदावृतः॥ शिव उवाच॥ पंकजासन तद्द
त्या स्तुत्या त्वत्कृतयानया॥ तुष्टोहमिष्टं ते भूयाद् वरं वरय सुव्रत॥ इत्यंशंकर वाक्यां ते प्रांजलिः
प्राह पद्मभूः॥ वेधा उवाच॥ ददस्मि ष्टं त्वया शंभो कष्टहारि पदं तव॥ मत्तो धन्यतरः को वा सुरपुं
गमेश्वर॥ किं चायमसुर कार्यार्थि विज्ञाप्यं श्रूयतां मम॥ तथान्यान् हन दैत्यांस्तान् समासु वांछिती:
वेदहीनं जगत्सर्वं निःस्वाध्यायवषट्कृतं॥ द्विजाध्यायनहीनाश्च हीनयज्ञा महेश्वर॥ यज्ञहीने
तथा लोके वृष्टिहीनाभवन्मही॥ निरोषधिरसा पृथ्वी गावश्चौषधिवर्जिताः॥ देवा भागविही
नाश्च कष्टं विष्टपमाश्रिताः॥ वेदमूलं जगच्छंभो वेदांस्त्वं दातुमर्हसि॥ वेदवेद्य महादेव वेदां ते सुप्र
तिष्ठितं॥ ब्रह्माणं प्रांजलिं शंभुरुवाच द्रुहिणं स्मितः॥ ईश्वरः॥ ॐकारकुंडे संस्नाहि तपसात्म ॥२७॥
मकल्मितः॥ कुंडलिंगालये तन्धि पवित्रं पापनाशनं॥ तल्लिंगशालके निसंमासमात्रं समर्चय॥ बि
ल्वपत्रैः पंकजेश्वरे वानीरैः सुरीतलैः॥ वेदशाखा मरनरुत्सदा ग्राह्या भविष्यति॥ अत्रैनिहासं च
ष्ये भविष्यं पंकजासन॥ बलिपुत्रो बाणनामा भविष्यति महासुरः॥ सहस्रभुजदोर्दंडश्चंडविक्र
ममंडितः॥ आखंडलादिविबुधान् संग्रामे स जयिष्यति॥ नित्यं मत्पादपूजायां निरतः स भविष्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ति॥ सहस्रलिंगानि सदा बाणः पूजयिता ध्रुवं॥ न तु जया संतुष्टो गाणपत्यं ददामि
च॥ मत्पूजारवर्वगर्वेण यदा लोकान्प्रबाधते॥ तदा तं मत्सुरश्रेष्ठ गर्वनिर्लोपणाय हि॥ अन्ये
षां दैत्यवर्गाणां विनाशाय महाद्युत॥ जनिष्यति सदा विष्णुर्नरनारायणात्मक॥ स विष्णुर्मां
समभ्यर्च्य संहरिष्यति तानपि॥ मनोलब्धं वरं दत्तं स्वेन संग्राममूर्धनि॥ तद्बाहुजालं भिन्नं च भ
विष्यति च तु मुखे॥ कृष्णेनाजिमुखे ब्रह्मंस्तत्तु तथाहं वनौकसः॥ बाणं च गणपश्रेष्ठं रक्षिष्या
मि प्रजापते॥ भक्त्यो मम पश्येच्च अहं तु यां परां सुखः॥ को वा मां जेतुमिच्छेत्तु विमम भक्तानुवि
ना त्रिजग॥ श्रुतयो मां वदंतीत्थं जेतारमपराजितं॥ नरः पार्थ इति ख्यातः पांडुपुत्रो भविष्यति॥ ते
नापि भविता युद्धं को नु कामे चमूमुखे॥ तदस्त्रजालं खड्गं च विश्वमो सोमसाम्यहं॥ मद्गु
णमांगेन सख्येव प्रहारं धारयाम्यहं॥ ते द्विजोत्तमो षितं श्वाहं तत्तामरख्यापनाम हि॥ ॐकारलिं
गे तु सदा बाणः संपूजयिष्यति॥ बाणेन पूजितं यस्मात् बाणलिंगं च प्रथे॥ बाणलिंगमभि
णं बहुलं पार्थप्रहरणांकितं॥ तादृशं मम भक्तेन पत्रं पुष्पं फलं विधे॥ दत्तं गृह्णाति तन्मद्भ
क्तितुष्टये मे भविष्यति॥ ॐकारकुंडे नत्मलिंगपूजां कुर्वन्सदा बिल्वदलैश्च नीरैः॥ सहस्र
मल्लिंगसमर्चनोत्थ पुण्यं लभेन्मुक्तिमुपैति नूनं॥ त्रिपुंड्ररुद्राक्षविभूतिभासुरो योबा
णलिंगं मम बिल्वमूले॥ रुद्रं जपन्नीरसुधारया शिवं सिंचेन्नरो बिल्वदलैः समर्च्य॥ मुक्ते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२५ भवेदेवसपुण्यभाक् सदा ॥ कुर्वंतं दाम्यथ श्रुणु प्रजायते ॥ पार्थप्रहारोत्तमबाणलिंगलिंगंविजा
नीहितदुत्तमंमे ॥ ॐ मित्युक्तो महादेवं ब्रह्मा स्कंदगणाधिपः ॥ स्नातास्तत्कुंडस्थु जलैः कार्तिके शु वि
शेषतः ॥ तल्लिंगमूतकं नित्यं पूजयामास भक्तितः ॥ भस्मरुद्राक्षभूषाढ्यो रुद्रसूक्तजपादरः ॥ सादरः
शिवपूजायां रुद्रविन्यस्तमानसः ॥ मासांते शंकरं ब्रह्मा सदाशिवमुदैक्षत ॥ भक्त्यानंदाश्रुपुलकः
पाहिपाहीति संवदन् ॥ प्रणनाम महादेवपादपंकजमादरात् ॥ सांजलिर्देवदेवेशं तुष्टाव गिरिजास
खं ॥ ब्रह्मोवाच ॥ श्रीबाणलिंगनिलयामलस्फटिकभूषविभ्वे शाश्वचमदनांतकविश्ववंद्य ॥ शंभोसदाशिव सचंदनबिल्वमौलेपाहि
प्रसीद परमेश्वर पंचवक्त्र ॥ विघ्नाधिकप्रमथनाथसुरासुरेड्य सोमाग्निविष्णुशरकृतपुरारिवर्ग ॥ त्रय्यंतवेद्य विधिवि
२ बि ष्णुमृग्य मौलिपादारविंद परमेश्वर पाहिदीनं ॥ एवं स्तुवंतं ब्रह्माणं प्रणतं भुवि दंडवत् ॥ उत्थाप्य दोर्भ्यां च तदाघ्राय शिरोरव
र ईश्वरः ॥ प्राह प्रगल्भवचनैः सुधाब्धिः क्षारिभिः शिवः ईश्वर उवाच उत्तिष्ठोत्तिष्ठमा भैषीर्वेदास्ते प्रतिमात्मनी ॥
सरहस्योपनिषदः सांगोपांगपुराणकाः ॥ सागमाः सोपवेदाश्च याश्च विद्याः सहस्रशः ॥ भाष्याणि सर्वशास्त्राणि गांध
र्वादीनि सत्तम ॥ उपाख्यानानि तेब्रह्मन् नोंकारः श्रुतिशेखरः ॥ उद्गीथगाथा सुभगो मयादत्ताः प्रजापते ॥ समुत्तस्थुस्तदा
वेदा ऋग्यजुःसामाथर्वकाः ॥ प्रणम्य देवमोंकारं तुष्टुवुः प्रमथाधिपं ॥ वेदा ऊचुः ॥ ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं ॥
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं नतास्म वै ॥ ऋचो अक्षरे परमे त्वामहेशं मल्लिंगमाकाशवासधर्मकं विभुं ॥ तांयो न वेद कि
मृचा करिष्यति साम्नाथ यजुषाथर्वणो वा ॥ शिवो वेदस्त्वं किं श्रुत्वा वेदांतासे दहो मुदा ॥ प्रणतं चाब्रवीद्देवो ब्रह्मा २५
णं विनयान्वितं ॥ ईश्वर उवाच ॥ वेदजालं निरस्यंतमया पंकजसंभव ॥ सुराणां यज्ञभागार्थं लोकानां साक्षी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मेवच॥ गच्छलोकं सुरैः सार्धं वसमद्भक्तिभावन॥ इत्युक्तं शंभो वेचः श्रुत्वा विद्याधिपतिमीश्व
रं॥ स्थानं ययौ प्रहृष्टात्मा प्रणम्य परमेश्वरं॥ उपनस्युस्तदा वेदा ॠग्यजुःसामथर्वकाः
प्रमाणमनुजग्मुस्ते गुरुं शिष्या इवामलाः॥ मुनीनश्राव पत्सर्वा सारस्वतमुखान
पि॥ तेषां शिष्यप्रशिष्यैश्च धृतो वेदो महात्मभिः॥ यत्तश्वागाः प्रवर्त्तंते सिद्धिमीयुर्द्विजो
त्तमाः॥ सूत उवाच॥ एतद्दे महदाख्यानं श्रावितं भूसुरोत्तमाः॥ माहात्म्यं देवदेवस्य ॐका
रस्य महेशितुः॥ यो वेदादौ स्वरः शंभुर्भगवान्परमेश्वरः॥ वेदांते महिमा यस्य स देवः
पातु वः सदा॥ यः पंकजासनमनंदितमेव सृष्टो संयोज्य वेदमखिलं प्रददौ महेशः॥ तं
त्वामबुधिभवनं शरणं महेशं यास्यामि घोरभवसागरगो मुमुक्षुः॥ इति श्रीशिव
व रहस्ये पंचमांशे नवमोध्यायः॥ देव्युवाच॥ त्रिलोकीतिलक स्वामिन्नीलकंठ स्वामिसुप्रि
य॥ ॐकारकुंडलिंगानां वाणलिंगस्य तत्कथं॥ ततो देव्या वचः श्रुत्वा संतुष्टः प्राह
शंकरः॥ सूत उवाच॥ उत्फुल्लनीलोत्पलनीलसुंदरीमुमां समालिंग्य तदा सदाशिवः॥ ब
भाणवाणोत्तम सत्कथां द्विजाः सर्वार्थदात्रीं सकलाघहंत्रीं॥ शृणु देवि महाभागे कथामेतां
न मनोरमां॥ गंगायामनमीशायाश्च विवादः सुमहान्भूत्॥ तत्सर्वं विस्तरेणैव तत्र सि सदीप्रकीर्धि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥२६ तं॥ अविमुक्ते वसामीति नित्यं सान्निध्यदे मया॥ गंगायै च वरो दत्तो नर्मदायै महेश्वरि॥
सिकतायाः शिलाः सर्वास्तानि लिंगानि निम्नगे॥ तदंतर्गतमेवाद्य कुंडमोंकारसं
शितं॥ गंगायां विश्वनाथस्य लिंगाकृतिरहं स्थितः॥ तत्तीरे नर्मदे लिंगमोंकारं प
रमेश्वरं॥ तल्लिंगरूपः सततं निवसामि तटे तव॥ दृष्ट्वा सर्वपापानि नाशयामि
न संशयः॥ अमरैः पूजितं यस्मादमरेश्वर मुच्यते॥ तल्लिंगामंडलाकारं ता
प विध्वंसि सरिद्वरे॥ ओंकारे च परं गुह्यं नर्मदावरसंगमे॥ सर्वत्र सुल
भा रेवा त्रिषु स्थानेषु दुर्लभा॥ तल्लिंगं सर्वभावेन पूजितं सर्वकामदं॥
इति तस्यै वरो दत्तो नर्मदायै मनोरमे॥ तानि लिंगानि सर्वाणि बाण संपूजिता ॥श्रीरा॥
नि हि॥ दर्शनात्स्पर्शनाद्देवि पुण्यदानि न संशयः॥ नार्मदेये महालिंगे नी ॥२६॥
रं वा पत्रमेव वा॥ दद्यात्स मुक्तोपाय तित्रिनेत्र प्रियवल्लभः॥ न संप्रोक्षण
संस्कारो न प्रतिष्ठा हि पार्वति॥ नावाहनं न पूजादि विधिः स्यात्तत्र शांकरि॥
सपीठं मुक्तपीठं वा नर्मदालिंगमर्चयेत्॥ स्पृष्टा स्पृष्टं न तत्स्यात्ति त्रिहं सान्नि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ध्यदंमम॥ तल्लिंगेममभक्तो भक्षयद्दत्तं लीलयापिच॥ बिल्वपत्रं यथानीरं फलंवाकंदमेववा॥ गृण्हामिशिरसा तच्च तस्मैमुक्तिं ददाम्यहं
हि मर्त्योनचकर्तव्यो नामर्मदे परमेश्वरी॥ अन्यानिसर्वलिंगानिप्रतिष्ठाप्रोक्षणादिभिः॥ संस्कृतानिविशेषेणपूज्यानितिनमतिः नर्मदे
शल्लिंगास्थानुलिंगानिरत्नजानिमहेश्वरि॥ स्फाटिकादीनिपुण्यानिचंद्रकांतोद्भवानिच॥ स्थावराणि चसर्वाणि जंगमानिवि
शेषतः॥ महापातकदक्षानिलिंगान्यन्युत्तमानिच॥ तेभ्योविशिष्टमेतद्धि नर्मदंनार्मदंमम॥ नार्मदलिंगमभ्यर्च्य फलं लभेत्
यत्तत्पश्यति पुण्यात्मा स्थावरंलिंगमैश्वरं॥ नित्यंचनियमोपेतः पापैःसर्वैः प्रमुच्यते॥ तन्नार्मदंमहालिंगंद्दष्ट्वा नत्फलमाप्नुया
त्॥ पूजितेनार्मदेलिंगेसर्वलिंगार्चनाफलं॥ प्राप्नुयान्नियतं गौरिसत्यमेतन्मयोच्यते॥ स्थावरेचेत्सहस्रेपिबाणलिंगंस
मर्चयेत्॥ नित्यलिंगार्चनफलंयस्मिन् कुलेनदाप्नुयात्॥ नातःपरतरंलिंगंममास्तिपरमेश्वरि॥ अस्मिन्संपूजितेदृष्टेमहापा
पक्षयोभवेत्॥ यद्गृहे बाणलिंगंस्याच्छिवक्षेत्रंहितत्स्मृतं॥ तत्रैवमरणाज्जंतुरपिकीटपिपीलिकं॥ मल्लोकेनिवसेद्देविपुनरा
वृत्तिदुर्लभं॥ बाणलिंगंनयस्यास्तिगृहेबिल्वदलार्चितं॥ नतद्गृहेजलंग्राह्यंमद्यंदेवोवेदिकोत्तमैः॥ यद्गृहेबाणलिंगार्चोस
मुनिःसचपंडितः॥ तेनेष्टाःसकलायज्ञावेदाधीताश्चतेनवै॥ तेनार्चितेयंदत्तास्यात्सशैलवनकानना॥ अत्रेतिहासंतेवक्ष्ये
शृणुकर्णविभूषणं॥ बलिर्नामपुरादेविदैत्येंद्रोबलगर्वितः॥ देवान्विद्रावयामाससेंद्रान्सवरुणार्यमान्॥ वारंवारंसुरैर्देविशु
श्रुमन्तमाननोत्॥ हत्वामरावतीतेनराज्ञःस्थानाधिपोभवत्॥ तस्यासीद्दृढागौर्वित्रैलोक्यंसचराचरं॥ सदीक्षितोश्वमेधेनाज
यजन्मांमहाबलः॥ स्वादन्नेनचसोमेनविधिवद्दक्षिणावता॥ त्रातामेधपत्निमांसःकाम्येनोत्तमसामुदा॥ एतस्मिन्नंतरे
विष्णुःप्रार्थितःस्वपदार्थिभिः॥ विष्णुर्नाच्छमरूपेणयाचितोदीक्षितोबलिः॥ पदत्रयंचविप्रोर्थुःस्वपानालंप्रापयन्नुत
दा॥ तत्क्रयास्वर्वगर्वेणवामनोमदमोहितः॥ मुनीनम्परणान्सर्वान्धिःकरोतिदुरात्मवान्॥ ततःपरशुधारेणमया
छिन्नःपपातच॥ तत्रतीर्थमभूत्पुण्यंकालंजरसमीपतः॥ देविवामनपातारव्यंतत्रस्नात्वादिवंव्रजेत्॥ संतर्प्यचपि
तॄन्तत्रतस्यास्नात्वादेवैःसमोदते॥ गतमोहस्तदाविष्णुर्मांतुष्टावमहऋषीः॥ विष्णुरुवाच॥ त्रंभोमरूपेन,सिंहवामन

स्थावरान्यो

महाकूर्मांगलोकास्थिभिर्देष्ट्राभिर्नरसिंहचर्मवसनास्त्वं गारभः पक्षिराट् ॥ त्रियत्तोनिम्नानेश्च पानकवरैः पूतोस्मि धन्योस्म्यहं नीतो
मोहदन्त्रां विलीनहृदयस्त्वद्भिक्षया शंकर ॥ दृष्ट्वातत्पदपंकजं त्रिवमहादेवेश्च पूर्वस्थितिं ज्ञानप्राप्तमपारभक्तिजनकं त्वत्प्रसादप्र
जाविधौ ॥ वैकुंठे निवसामि भूतिविलसत्कालादिभूषांगको लिंगं बिल्वदलैश्च पुष्पनिकरैः संपूज्य मुक्तः सुखं ॥ गतमोहोस्म्यहं
देव गिरिश्चिन्नश्च त्वया पुनः ॥ भ्रगुण्यानतव भक्तेन त्वाश्रेष्ठास्मि नितरां त्रिव ॥ नच्छाप मुक्तोस्म्यधुनात्तिर्यग्योनिषु संस्थितः ॥ मत्स्य
कूर्मवराहादिनारसिंहादि वामनैः ॥ त्वया धृतैर्देहजालैः पावितोहं महेश्वर ॥ अनुग्राह्योस्मि देवेश पुनः पंचसु जन्मसु ॥ प्रणम्य
मायया विलुप्त येति च मयो दितः ॥ बलिश्चापि मुदं प्राप्य रसातलतलं गतः ॥ तस्यासीदौरसः पुत्रो नाम्ना बाण इति श्रुतः ॥ सराज्य
मयदैत्यानां च कारागिनसमप्रभः ॥ श्रुत्वास्यानुमतं देवी श्रावयामास विष्टपान् ॥ त्रिपिविष्टप्रसादेन विशिष्टः सुरसत्तमैः ॥ स
हस्रबाहुत्रास्वाढ्यो नागायुत बलो बलिः ॥ संचरत्सम हीपृष्ठ नर्मदो नर्मदां मम ॥ स्नातो भस्मकराद्यंगो रुद्राक्षवरभूषणः
बिल्वपत्राणि संपाद्य पुष्पभाराणि दैत्यपः ॥ सहस्रेनार्मदं लिंगं संपूजयति शंकरं ॥ धूपदीपोपहारैश्च नैवेद्यैर्भूषणैरपि ॥ नि
त्यं संस्तौति हृष्टात्मा बलिसूनुरनन्यधीः ॥ सहस्रहस्तांजलिभिः प्रणमन्नमत्पुनः पुनः ॥ स्तसंपादतलैर्भूमिं कंपयन्बलि
नंदनः ॥ गिरींद्रचलितोल्लोलनत्रस्तकुदिग्गजः ॥ हस्ततालमहारावबधिरीकृतदिङ्मुखः ॥ अस्तौषीन्नाम हार्देवि
बाणो भक्तिपुरःसरं ॥ बाणउवाच ॥ महादेव कर्पूरगौरामरेंद्र महामेरुकोदंड चंडप्रचंड ॥ महाचंडवेतंडशुंडोरुदंडा
समुद्दंडलीलापारलीलाब्धिनीपत्रपूज्य ॥ कुंडलीन्द्रलसत्कुंडलं त्रंभोखंडिताखिलसुरद्रुमखंड ॥ ब्रह्ममुंडकलिता
मलमालं स्थूललिंगगणमंडलसंस्थ ॥ नवचंद्राभरणोत्तमांगगंगाकलितालकभूधरोरुमाल ॥ घनहालाहल
कंठमूलबाहुस्फुरदुत्तमश्रीलाविघूमकूल ॥ वसुधाधरधारकंमहेशं विबुधाधीश्वरसन्नतांघ्रियुग्मं गिरिकंदरसं
स्थितान्तरंगं भजामि अहं सुंदरसिंधुरहं तिचेलं ॥ नीलाभ्रसन्निभ महामहिषाधिरूढं चंडान्तुजप्रबलसर्पगणाद्विपा
त्रोः ॥ लिंगालिंगनतत्परद्विजसुतं कर्षंतमत्युन्मुखं कालं संपदताडितद्विजसुतेदत्तायुषं तं नुमः ॥ चिधिकलित
कपालजालमालं बलितनया र्चितबा[illegible]णालिंगलोलं ॥ करविधृतकपालं भालमालं सन्मूलं गलधृतगरबी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लंकालकालं नमामि ॥ अद्यावाक् तस्य शंभो तव निखिलमहो सुष्टुतिं शीरयामि त्वल्लिंगेक्षासुचक्षुः
भवदमलकथाकर्णनैः सुश्रवाहं ॥ त्वत्पादार्चासुहस्तस्तवपदकमलध्यानतः सन्मनाहं सर्वांगांगास्थि
रं च त्वयि भवति विभो रंकुरुष्व प्रसीद ॥ माकंदं पिकसुंदरीव भगवन् कांता यथा कामुकं मत्तालिः सरसीरु
हं द्विजगणो दातारमाकांक्षते ॥ तद्वत्त्वां परिचिंतयामि सततं तूर्णं कृपावीक्षणैः संपूर्णं कुरु मामकिंचनमहो
भाग्यैरभाग्यालसैः ॥ इत्थं स्तुवानस्तदा बाणो मामानंदपरिप्लुतः ॥ साष्टांगं प्रणनामाथ बाणपातप्रमाणके
तस्मिन् संदर्शनं दत्तं तस्मै शैलेंद्रकन्यके ॥ चतुर्बाहुमुदारांगं नीलकंठं वृषस्थितं ॥ गंगाचंद्रकलामौलिं रव
उक्पूरसन्निभं ॥ वृंदारवृंदैः सततं सेव्यमानपदांबुजं ॥ मंदारकुंदमालाभिः कुंडलोलाभिरीश्वरं ॥ गण
वृंदैर्महादेवि तस्मै दत्तं च दर्शनं ॥ दृष्ट्वा मां देवदेवेति प्रसीदेति वदन्मुदा ॥ प्रणाममुखरोदेत्यो वरेणच्छंदितो
मया ॥ ईश्वर उवाच ॥ उत्तिष्ठोत्तिष्ठ दैत्येंद्र महेंद्रसमविक्रम ॥ गिरींद्रशिखराकार मृगेंद्रामरलोचन ॥ वरं व
रय मत्तस्त्वं यदि त्वसितदस्तु ते ॥ इत्थं मद्वचनांभोजवाणीं श्रुत्वा सदैत्यपः ॥ प्रणम्य मां तदा प्राह विनयानत
कंधरः ॥ बाण उवाच ॥ भक्तिं त्वदीयजनसंगममेव शंभो लिंगार्चनं च सुभगं तव बाणलिंगे ॥ संप्रार्थया
मि भगवंस्तव भक्तिभावं वांछा न मे भवतु तुच्छभवादिधर्मे ॥ किं यागे रतितुच्छभोगफलदैः स्वर्गादिपातं
तिकैः किं गोभिर्धनधान्यरत्ननिकरैर्हैमैश्च पात्रार्पणैः ॥ शंभोर्नार्मदलिंगमस्मनततं बिल्वीदलैः कोमलैः
संपूज्य प्रमथाधिनाथपदवीं प्राप्नोति भाग्यैर्युतः ॥ नीरैर्नार्मदजैः सशोधितमहाकर्पूरखंडद्रवैः ॥ संसे
व्यालोक्य हरोभवद भयपदं प्राप्तुमिच्छामि शंभोगाणाप संमया स्तु प्रियमममरवरैः दुर्लभं त्वत्पदाब्जे ॥
ये भक्तिसंक्लैः सहास्तु प्रतिदिवसमहासंगमश्चापि हारी सद्यो नार्मदलिंगमंडलमिदं बाणाख्यतां प्राप्नुया

मोहमसंप

॥शिवर०॥ [५८]

५ केदारेशमुनिर्विश्वनाथ लक्ष्मी मल्लिर्मृत्वर्देनेश
नर्मवाहि॥ नस्मिन्श्वे क्वचिरेद्वि

॥२८॥ एवं देयो वरो मे प्रथइतुमखिलं लोक मद्य प्रसीद॥ ईश्वर उवाच॥ तस्योदारवचो निशम्य गिरिजे दत्तो वरो मे कृतो
गाणापत्यपदे स देसुतनयः शाक्रादिवैगौपहः॥ सर्वे भक्तजनार्पणाय सततं चित्तं मदीयं सदक्तो भुवि दुर्लभः सुर
कूरः श्रीबाणलिंगार्चकः॥ ॥इति श्री शिवरहस्ये पंचमांशे दशमोध्यायः॥ ॥देव्युवाच॥ श्रुतं बाणा
सुराख्यानं भवतः परमेश्वर॥ केदारस्थानमहिमां वदाद्य शिवशंकर॥ सूत उवाच॥ महादेवो महेशान्या पृष्टो
दक्षमखांतकृत्॥ देवीं प्राह अरविंदाक्षीं केदारस्थानवैभवं॥ ईश्वर उवाच॥ अस्ति क्षेत्रवरं देवि ब्रह्माद्या विबुधो
त्तमाः॥ निवसंति महाभागे केदारेश्वरपूजकाः॥ तल्लिंगसदृशं लिंगं न भूतं न भविष्यति॥ हित्वा कैलासशिखरं
गिरिशो वसतीश्वरः॥ सदा तत्र महादेवा वसंति शिवतत्पराः॥ भस्मरुद्राक्षवीतांगास्त्रिपुंड्रावलिभासुराः॥
केदारेशस्य देवस्य नियमाराधनेरताः॥ षट्सहस्रं फलाहारा वाय्वाहाराश्च पंचकं॥ त्रिसहस्रांबुपर्णाशा भासु
राः शिवतत्पराः॥ च्यवनो भार्गवाश्चैव भारद्वाजाश्च काश्यपाः॥ मौद्गल्या वीतहव्याश्च वैश्वामित्रात्रिसंभवाः
मत्प्रसादफलकास्सर्वे केदारक्षेत्रवासिनः॥ ब्राह्मणाः ब्रह्मसदृशास्त्वृग्यजुःसामपारगाः॥ निवसंति सदा देवि
ममलिंगार्चनेरताः॥ पंचाग्निनिरताः केचित् केचिताग्निचारणाः परे॥ नारदाद्याश्च मुनयो वसंति सततं शिवे॥
गंधर्वाः सिद्धनागाद्याः यक्षाः किंपुरुषाः सदा॥ पत्नीभिः शैलशिखरे केदारेश्वरसेविनः॥ मामाराध्य समा
राध्य ब्रह्म विष्ण्वादयः सुराः॥ स्वं स्वं स्थानमवापुस्ते केदारेशसमर्चनात्॥ अत्र केदारनाथं यो शिवरात्रौ चतु
र्दश्यां॥ उपोष्य प्रयतो भक्त्या देवि यामचतुष्टयं॥ पूजां कुर्याद्बिल्वपत्रैः स मोक्षमधिगच्छति॥ अन्यत्र कोटिलिं
गार्चफलं यत्सुरसत्तमे॥ केदारेश्वरमौलौ तु एकबिल्वार्पणाधितत्॥ एकं वा भोजयेद्विप्रं केदारे कोटितद्भवेत्
भोजयेत्वेवमेकं तु तदनंतफलं स्मृतं॥ तस्य केदारनाथस्य कुंडं पर्वतमूर्धनि॥ ख्यातं केदारकुंडं तत् उत्फुल्लकम
लो...ं॥ तत्कुंडपूतपानीयैः स्नात्वा संतर्पयेत्पितॄन्॥ पितरस्तृप्तिमायांति द्वादशाब्दं सुरेश्वरि॥ पुरांधकासुरं

॥पंचमो॥ शिवे श्रीराम ॥२८॥

CC-0: Jangamwadi Math Collection. Digitized by eGangotri

हत्वा तद्धूलाग्रेण त्वां कृरि॥ वसितुः शिखरैः पुण्ये त्वया तत्खानितं सरः॥ तस्मिन्सरसि विस्तीर्णे तत्तटे त्व
तपोवनं॥ मत्प्रीतये त्वया देवि चीर्णा तत्र तपःक्रिया॥ तत्तीरे स्थापितं लिंगं त्वया गौरीश्वराभिधं॥ तल्लिंगद
र्शनादेव मम लोके महीयते॥ वसिष्ठात्रिमरीच्याद्या भरद्वाजपराशराः॥ दुर्वासगौतमाद्याश्च भृगुकुंभोद्भ
वादयः॥ दधीच्यांगिरसोचथ्याः जामदग्न्यो महाबलः॥ क्षेत्रमुत्साद्य विप्रेंद्रैः पार्थितः शमम आगतः॥ हि
मवन्मूर्ध्नि सरसस्तीरे तप्यंति तापसाः॥ केदारनाथं दृष्ट्वा मां पूज्य बिल्वैः सकोमलैः॥ उपहारैश्च विवि
धैरपारैः फूलमंडलैः॥ तद्गौरीसरसि स्नात्वा पुण्ये पापोपहारिणि॥ वृत्रं हत्वाथ जंभारिर्वज्रेणासुरस
त्तमं॥ ब्रह्मनाशवत्सरसि गौर्यास्मे पापनुत्तये॥ स्नात्वा सुरगणैः सार्धं ब्रह्महा शुद्धिमागतः॥ केदार
नाथं दृष्ट्वा मां शक्रः सुरगणैः सह॥ तुष्टाव मां तदा भक्त्या तत्स्तुतिं शृणु शांभवि॥ इंद्र उवाच॥ शंभो वि
श्वेश भर्ग त्रिनयन भगवन् कालकालांधकारे पुरहर दुरितारे घोररूपांतकारे॥ शमय शमय दुःखं देस
वर्गारियुद्धज्वरहर भयहारिन् पाहि केदारनाथ॥ शक्रः केदारनाथं मामेवं स्तुत्वा प्रणम्य च॥ विहाय पा
पं तदेवि त्रिविष्टपमगात्तदा॥ वरुणोपि महादेवि विप्रभार्यां पुराहरत्॥ उचथ्यस्य बालाशापीकामबाप
प्रपीडितः॥ जलोदरमहारोगग्राहग्रस्तो भवच्छिवे॥ प्रणम्य मां महादेवि केदारेशं प्रपूज्य च॥ विमुक्
स्तेन पापेन मां स्तुत्वैव सभक्तितः॥ वरुण उवाच॥ मारमारककरवीर सुमाद्धा स्त्रग्धरामरवरादिसुपूज्य
संस्थितामरगणेंद्र भूधर शंभो पाहि मामखिलपारदवीर्य॥ स्तुत्वैवं पाशहस्तो मां नत्वा संपूज्य मां शिवे
ययौ स्थानं स नीरोगो मुक्तमेघ इवोडुराट्॥ मांडव्येनापि सुभगे शप्तश्चांडांशुनंदनः॥ शापमुक्त्यै स के
दारं मां प्रणम्याथ शूलिनं॥ बिल्वपत्रैः समभ्यर्च्य स्नात्वा गौरीसरित्तटे॥ पुण्यान्निसमद्धैर्मंत्रैः समुत्फु
ल्लस्वकांततनुं॥ तुष्टाव मां विशुद्धात्मा केदारेशं महेश्वरं॥ यम उवाच॥ त्वां तत्स्तुषः स्पतिमहो भगवंतं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बभ्रुस्त्वंचहरिकेशमुदारं॥ मृगंनभीममुपहत्नुमुग्रंप्रसाद्यपापैर्नबिभेमिशंभो॥ एवंमामंबिकेस्तुत्वा
मुक्तशापःसस्सूर्यजः॥ जगामदक्षिणामाशांपितृभिःपरिपालितां॥ कुबेरोयक्षराट्देविपौलस्त्येनाथनिर्जि
२९ तः॥ जगामपरमामार्तिंमांकेदारंप्रणम्यच॥ संस्नायगौरीसरसिभस्मरुद्राक्षभूषणः॥ तत्कुंडतोथि
तैर्नैरैर्बिल्वपत्रैःसमर्च्यच॥यक्षराट्मांविरूपाक्षमस्तोषीज्जगदंबिके॥ कुबेरउवाच मीढुष्टमःशि
वतमस्त्वमसिप्रसिद्धःसिद्धांतसारमहिमन्मृडयासिशंभो॥ संसारघोरविपिनोद्भवदावदग्धंत्वन्मू
र्धचंद्रकिरणैःममशीतयांगं॥ इत्थंसयक्षराट्देविस्तुत्वामामुमगजापतिं॥ धनाधिपत्वंसंप्रापउत्तरा
शापतिःसदा॥ एवंदिशानामधिपाविदिशांपतयस्तदा॥ अभीष्टंप्रापुरस्यर्थंमामाराध्यैवभक्तितः
अग्निश्चनिर्ऋतिर्वायुरीशानोमद्गुणोत्तमः॥ मत्सारूप्यमुदाप्राप्यमांकेदारंसमर्चयन्॥ तुष्टुवुर्विदि
शांनाथाविप्रशापप्रपीडिताः॥ अग्निश्चसर्वभक्षत्वंनिर्ऋतिःपापकारितां॥ वायुरायासराहिसमी
शानोमत्स्वरूपतां॥ अग्निवायुनिर्ऋतीशानाऊचुः॥ महादेवोदेवःसकलजगदाराध्यचरणोजगद्र
क्षादीक्षास्थितिजननचातुर्यकरणः॥ हरिब्रह्मास्कंदोगणपतिरुमाद्याश्चिदितिजास्त्वथवर्णेषुप्रथि
तयशासेवैतवनमः॥ एवंस्तुत्वाथतेसर्वेविदिशांपतयस्तथा॥ लेभिरेपरमांसिद्धिंकेदारेश्वरपूजना
त्॥ मुनयश्चापिदेवेशिविश्वामित्रोत्रिरंगिराः॥ तेपुस्तपोमहाघोरंज्वलत्संध्याग्निमध्यगाः॥ ब्राह्मण्य
प्राप्ययेदेविविश्वामित्रेणसंस्तुतः॥ विश्वामित्रउवाच॥ गायत्र्याप्रतिपादितोसिभगवन्संसारसंभ
र्जकोभर्गस्त्वंसवितुर्वरेण्यमहसस्त्वांसर्वदाधीमहि॥ तेजस्त्वासगतंदिनोदयविधौविप्रादिभिर्ध्याय
सेबुद्धिंनिश्चयकारिणींचभगवन्संचोदयस्यांतरः॥ अत्रिःपुत्रविहीनश्चऋषिरिश्याल्लोन्वतप्यत॥ औ २९
र्वपिपुत्रान्दत्तास्त्वान्पुत्रान्नाप्तुंतदाद्रिजे॥ इष्ट्वांश्चातिरात्रेणास्मिन्भूधरसत्तमे॥ मांस्तुत्वाचांबिके

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुत्रांश्चतुरः प्रासवांस्तदा ॥ अंगिरुवाच ॥ राजाने खामध्वरे नूंचरुद्वं होतारं त्वां सत्यैरादस्योः ॥ विष्णुरातनसमादृचिनमरयास्
येंत्रीवं ऋाश्वनंप्रा सेस्यन्व हमेकमेवनूरणंहिरण्यरूपमवसेत्नणुर्ध्वं ॥ मंत्रार्थवादविधिषुप्रभूतास्तासुक्रियामरवज्ञानेऽथफले
विचित्रे ॥ पोधरयिः स्वर्गमथप्रजापश्नून्पुष्टिंप्रतिष्ठांचनथोजस्तिलं ॥ नन्नपरोचोकयदेषुनिविष्टचित्ताः किं नश्वरैः फलगणैः
प्रमथाधिनाथं त्वाम ध्वरेश्वरमहाफलदाननुलं नाराधयंतिसहसाजडबुद्धयस्ते ॥ अंगिराश्च महादेवि केदारे त्वामथास्तवीत् ॥
५ रा प्याताविनिवृत्तः पूर्वदौरुत्यादस्यगर्विणा ॥ आंगिराः ॥ न थं तदीयजनरूप्यपिसामिचंद्रचूडप्रभोमथिमहादसमग्नकर्षे ॥ वं
वेदगीतमधिवसूतेयाप्रसिध्यःपाहिरामामकधियासहमानरूपो ॥ एवंस्तुतायमुनयः स्वाभीष्टं प्रापुरंबिके ॥ केदारे त्वत्प्रसा
देन जग्मेस वैमरुद्गणाः ॥ सूतउवाच ॥ कोवाकेदारलिंगं जनित्रानचितनापरपापेकथंगंधालेयाचलकंधकापरिलस
द्दामांगसंगंसदा ॥ दृष्ट्वानंगभुजंगसंगजनितानंदांगकोपस्फुरफालांपांगकृतांगसंगरहितं श्रीत्र्यंगमीशांभजे ॥ ॥ ॥
इतिश्रीशिवरहस्ये पंचमांशे एकादशोऽध्यायः ॥ ॥ ईश्वरउवाच ॥ अथान्यदपिवक्ष्यामिपितुस्तेचरितंत्रिये ॥ स्वमो
लोवासयन्मांहितवद्वियोगभयादुमे ॥ सूतउवाच ॥ देवदेववचः श्रुत्वाहृष्टापर्वतनंदिनी ॥ साऽप्रणम्यविभ्वेशं त्वत्पितुश्च
रितं द्विजाः ॥ देव्युवाच ॥ कथंममपितात्वांतुमद्वियोगभयात्प्रिय ॥ स्वकीयवित्रिशिखरेत्वांप्रावासयमाकथांवद ॥ श्रुतीत्रिलें
द्रजावाक्यं श्रुत्वातुशोऽब्रवीत्तदा ॥ ईश्वरउवाच ॥ वक्ष्याम्यगसुतेतेद्यपितुश्चरितमुत्तमं ॥ सावधानमनादेविश्रृणुसर्वां
गसुंदरि ॥ दक्षः प्रचेतादेवेशि चाक्षुषस्यांतरे मनोः ॥ अभजस्वयमेपेनमां हितैवसुरोत्तमं ॥ ब्रह्माब्रह्मानवत्नस्पसदस्ये
विष्णुरीश्वरि ॥ अध्वर्युरत्रिरभवद्धोताचाथकहोत्वकः ॥ उद्गाताचाभवत्तस्यतेदुर्वासद्विजोत्तमः ॥ अथान्येऋषयोभूवन्
याजयद्दक्षप्रजापतेः ॥ ताजुहावतदादेविसांहिदक्षायणींतदा ॥ कौतुकाद्दृष्टहृदयापितुर्यज्ञदिदृक्षया ॥ गंतुमैच्छःसुरान्
दृष्ट्वाविमानगतिकांस्तदा ॥ निवारितासिसुभगेमयाचापिगणेश्वरैः ॥ गतवत्यसिकल्याणिस्त्रीलोलयात्वस्यनतदः ॥ नै
वापश्यत्तदालोकुतुकतःप्रजाकुतोरतिः ॥ संक्रुधंपितरंज्ञात्वात्वांवेनत्वमभाषथाः ॥ सत्युउवाच ॥ सर्वदेवगणाध्य
सेत्वमाहूताः सदस्यथ ॥ कथंनाहूतवान्शंभुमेत्तलिसदत्तसत्तिः ॥ पितःसदोत्ततेशंभोर्भावहूतेपलिहीनतः ॥ किमन्यैः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रारुतैर्दैवैः पूजितैरध्वरे फलं ॥ राजा यज्ञ ध्वरस्यास्य साक्षान्मेधपतिः शिवः ॥ स्विष्टकृद्भाग एवायं तं तथा कर्तुमर्ह-
सि ॥ सूत उवाच ॥ दक्षस्तदा सतीवाक्यं श्रुत्वा क्रोधवशंगतः ॥ उवाच भर्त्सयन्देवीं देवानां चैव पश्यतां ॥ दक्ष उवाच
किं मे रुद्रेण कर्तव्यं प्रयाने पसु मध्यमे ॥ यज्ञेशं विष्णुरीड्यो यं श्रुत्या व्याप्य प्रपूज्यते ॥ इत्थं तदा खर्व गर्वेस वचो कृलमान-
सं ॥ उवाच क्रोधतान्त्रासी स्वतीस्वपितरं कृपा ॥ सती उवाच ॥ नायं यज्ञो यज्ञ विनायज्ञेशेन विनाकृतः ॥ भविष्यति
ह्यदेव श्रुणु मद्वचनं पितः ॥ इत्युक्त्वा योगमास्थाय ददाहात्मतनुं सती ॥ दृष्ट्वा सती तदा दष्टां हाहा हेति वदन्सुराः ॥ दधीचिः
क्रोधताम्रास्यो दक्षं तं प्रत्यभाषत ॥ दधीचिरुवाच ॥ दीक्षितोस्य ध्वरे चायं कथं दीक्षापतिः शिवः ॥ विनिंदस्यद्य मौर्ख्येण धि-
के यज्ञं सभासदः ॥ पुरुषो वै महान्रुद्रः इत्याह श्रुतिरादरात् ॥ याग स्विष्टकृद्भुतो हि स कथं नैव पूज्यते ॥ सर्वं निवेद्य वै शंभोः सु-
खी भव सबांधवः ॥ सूत उवाच ॥ दधीचिवाक्यात्संक्रुद्धो दक्षो विप्रं यथाब्रवीत् ॥ दक्ष उवाच ॥ नैवेद्यं यच्छिवे दत्तं न ग्राह्य-
मपवित्रितं ॥ विष्णुरेवात्र यज्ञेशः किं प्रलापेन भूसुर ॥ गच्छ गच्छ सदो हित्वा तं तुच्छं वञ्चसे कथं ॥ मुनिर्दक्षवचः श्रुत्वा
क्रोधात्संशप्तुं दक्षं तं ॥ प्रोवाच दीक्षितं दक्षं विष्णुपक्षावलंबिनं ॥ दधीचिरुवाच ॥ गंगां तं गगरिपोर्जटाविगलितान्मौलि-
पुष्पं शश्री केतुगास्तस्य वियत्तलो विगलिताद्वृष्टिर्जगज्जीवनी ॥ रुद्रोग्निः श्रुत एव सर्वमतं नं ज्ञात्वा ध्यापचन्ते तन्निर्मा-
ल्यं जिहासु वीभित्सि भुवने तैः केन वा जीव्यते ॥ शंभुः शंकर इत्यपि श्रुतिशिरोघंटादि घोषो महान् तं त्यक्त्वा सुर गर्दभं जगनिज-
राकामादिघोषास्पदं ॥ विष्णुं जिह्मधियं भजंति नरखरा मोहांधचित्ताः सदा संसारार्णव मज्जनैरनुदिनं दुःखाय ये के-
वलं ॥ श्रीमृत्युंजयपूजनेमतिरुदत्य स्माकमिष्टप्रदा सोस्य सिः सुखमोक्षदो हननपरालिंगार्चकैः पालिता ॥ तस्यावसाने म-
हेशभाव भ उक्तं वध्वा मना गो श्रद्धे कपीला भक्तिप्रपयः सुधुं दिल महागाध्ना वसामो वयं ॥ इत्युक्त्वा निर्गतो गौरी दधीचिः स्वा-
श्रमं तदा ॥ दाक्षायणी पुरा सा त्वं मेनागर्भमाश्रिता ॥ तमुदंतं तदा श्रुत्वा नारदाद्दहनाधिके ॥ वीरभद्रं च कालीं च
स्रष्टा तं त्र्यम्बक पर्षणं ॥ कृतवान्स महादेवः शिवदिव्यो गाग्निदीपतः ॥ देवान्विप्रान्स दंडैः प्रदुतरगदया भिन्नमस्ति-

गृ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नु

कत्रीर्षा अतुश्च कारकृतांछर वर निकरैः कार्मुक ज्या विसृष्टैः॥ दक्षं दीक्षा रचितं च प्रकटकर तलैः पूषदंतान् संधो हृ
स चांक्षादि तुष्टेर्भगनयनवरं पानयं तोगणेंद्राः॥ स्वच्छुधिरसंधिनो हरिविधींद्र मुख्यामरांश्चिदु द्रुतुरस्थापरे
प्रबलवीरभद्र हताः॥ करालकरवालकैर्विकृतकालदंष्ट्रादिभिर्विदारितकरांगकाः शरणमीयुरीशं सुराः॥ दे
वा ऊचुः॥ अखर्वगर्वोद्धतदक्षशिक्षाकरोग्ररुद्रोद्भववीरभद्रं॥ प्रभग्नदेवद्विजकं प्रतापहं स्तु पाकरापारसुधामये
सुरैः विमथ्यमानाब्धिसमुत्थितोरुगरेण नीलीकृतकंठ पाहि नः प्रभो॥ उमामुखसमुल्लसत्स्फुरद्दपांगगंगाधर प्रसीद
परमेश्वर प्रथितदक्षमन्यूथितं॥ प्रचंडतरमन्यवे प्रमथनाथनःपालय कृतस्त्वपूलाधिकं भवतुबोधितं तव मदं॥ प्रस
भजनकामदप्रवरदीक्षितोग्रप्रभो॥ इत्थं सुरवचोदेवि श्रुत्वा यज्ञफलं ततं॥ पूरयित्वा महादेवि तं दक्षं दत्तकं परं॥ अ
नुगृह्य मरेंद्राश्च वीरभद्रं निवार्य वै॥ तत्रांगसंगविरहाद्दत्तं गोविचराम्यहं॥ तथापि सरस्तु विषिप्तेपतने न गरेतथा॥ नै
लेंद्रशिखरे देवि चिरामेनद्यद्विदिवमे॥ कपरो हिमवानेष लसितावारु कंदरः॥ अस्मिन्नेव वसामीति मनोमेभव दुस्तुरं॥ त
पस्तप्तं मया देवि वर्षाणामयुतं तदा॥ एतस्मिन्नंतरे देवास्तारकासुरपीडिताः॥ मदंगसंगसंभूतं तनयं मज्ञ येशुतं॥ प्रासुंदे
वगणाः सर्वे मन्मथाद्वैश्च संयुताः॥ पितुर्नियोगात्मानुसंततः श्रुषंत्या त्वयातदा॥ मां ते देवगणादेवि तु धीरे तस्वीश्व
रं॥ प्रधर्षयंतिमारेण दग्धो मारः क्षणात्मया॥ तदा मां तं भयात्यक्त्वा तप उग्रं समास्थितं॥ पितरं प्राप्य वत्स्येवपुनस्त्वं तप
सि स्थिता॥ नारदोदितवाक्येन ब्रह्मणा च महीधरः॥ सुरैः संप्रार्थितश्चाथ मह्यं त्वामददाद्द्रुतं॥ त्वयासहाहं कल्याणिनिव
सामि नगोत्तमे॥ तदा कालेन संजातः कुमारो मे मितः प्रभः॥ षण्मुखः कृत्तिकासूनुरग्नेयो ग्निसमानभाः॥ देवाश्च वरदं पुरस्
स्यमूर्ध्निपुष्पोत्करं स्त्रिते॥ ननृतुश्चाप्सरः सघाः प्रावाद्य देवतूर्यकं॥ सेनापत्येभिषिक्तश्च देवैः सेंद्रपितामहैः॥ विजित्ये
तारकं क्रूरं देवैः सदनुयायिभिः॥ तारकारिरिति ख्यातः पुत्रस्ते गिरिजे मलः॥ एवं स्थितेतदा सेभ्रगणैर्देर जतात्तलं
मंदरं सुंदरं चारुकंदरोपैर्विराजितं॥ तस्मिन्मंदारवृंदाढ्ये मरंदसुमसुंदरे॥ विहर्तुमिच्छा मे जाता तया साकं वरान
ने॥ गतो गतागतेः सार्धं त्वयाप्युपरकत्यने॥ त्वद्वियोगभिया देवि दुःखेन च परिप्लुतः॥ सम्यं तुष्टा वह ह्यत्मा हि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मवांश्चारुकंदरः॥ हिमवानुवाच शंभो विश्वेशनगेविनयनपुरहनूपा हिमाभीशदृष्ट्याख्यातो वेदगिरीशो गिरिशाद्भुति
भवांतकरुणाकरत्वं॥ शंभो देवानयाने सुरविनुतयुतास्ते हपादैर्वियोगं नोसह्यं मे महेशाममत्रिखरवरे संवसात्रैव
शंभो॥ मदीयापराधानमोघानतं नामके नापि वाक्यान्विनिर्वातितुं तान्॥ महादेव ते पादपद्मं प्रपन्नः प्रप
न्नः प्रपन्नः प्रपन्नः॥ श्रीमद्धि त्वं महीरुहोपचलनैर्बीनादिभिः पावितं गात्रं मेद्य पवित्रतामुपगतं
पाहि त्रिणेत्राधुना॥ तन्मूलनीरफलपुष्पमरुत्कनेत्रं च तद्दर्शनेऽद्य गणितं कुसुमगंधबंध मधुरं परस्येव
